भासकः-सिका, भासकः-सिका, बिभसिषकः-षिका, बाभसकः-सिका ; भसिता-त्री, भासयिता-त्री, बिभसिषिता-त्री, बाभसिता-त्री ; [1]बप्सत्-बप्सतौ-बप्सतः, [2]भासयन्-न्ती-ती, बिभसिषन्-न्ती-ती ; भसिष्यन्-न्ती-ती, भासयिष्यन्-न्ती-ती, बिभसिषिष्यन्-न्ती-ती ;— इत्यादीनि सर्वाण्यपि रूपाणि आदादिककशतिवत् (178) ज्ञेयानि। [3]नभः, [4]भस्म, [5]भस्त्रम्, [6]भसत् इतीमानि रूपाण्यस्माद् भवन्तीति विशेषः।

## (1153) "भा दीप्तौ" (II-अदादिः-1051. अक. अनि. पर.)

[7]भायकः-यिका, [8]भापकः-पिका, बिभासकः-सिका, बाभायकः-यिका ; भाता-भात्री, भापयिता-त्री, बिभासिता-त्री, बाभायिता-त्री ;

---

1. शतरि, शपि, तस्य 'जुहोत्यादिभ्यः—' (2-4-75) इति श्लुः। 'श्लौ' (6-1-10) इति द्विर्वचनम्। 'घसिभसोर्हलि च' (6-4-100) इति उपधाऽकारलोपः। 'खरि च' (8-4-55) इति भकारस्य चर्त्वेन पकारः। अभ्यासे हलादिशेषजश्त्वादिकम्।
2. भक्षणार्थकत्वे, 'निगरणचलनार्थेभ्यः—' (1-3-87) इति ण्यन्तात् कर्तृगामिन्यपि क्रियाफले परस्मैपदमेव। दीप्त्याद्यर्थकत्वे, छान्दसत्वात् दृष्टानुविध्याश्रयणे वा शानजन्तेऽपि **भासयमानः** इति रूपं साध्वेवेत्यपि बोध्यम्।
3. न बभस्ति इति **नभः**=आकाशः। नञ्पूर्वादस्मात् 'अन्येभ्योऽपि दृश्यते' (3-2-178) इति क्विपि सकारस्य रुत्वे विसर्गे च रूपमिति **आत्रेयादयः** साधयन्तीति **माधवधातुवृत्तौ** दृश्यते। अत्र बाहुलकात् नञ्समासे नलोपाभाव इति बोध्यम्।
4. भाषायामपि, 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति मनिन्प्रत्यये 'नेड् वशि कृति' (7-2-8) इतीण्निषेधे रूपमेवम्। 'भूतेऽपि दृश्यन्ते' (3-3-2) इति भूतेऽर्थे प्रत्ययः। भसितम्=**भस्म**।
5. 'हुयामाश्रुभसिभ्यस्त्रन्' (द. उ. 8-84) इति त्रन्प्रत्यये रूपमेवम्। 'तितुत्रत—' (7-2-9) इतीण्निषेधः। बभस्तीति **भस्त्रम्**=चर्म, उदरं च।
6. 'शृदृभसोऽदिः' (द. उ. 6-42) इत्यदिप्रत्यये रूपमेवम्। बभस्ति, भस्यते वा तस्मिन् आहार इति **भसत्**=आमाशयस्थानम्।
7. '**आतो युक्चिण्कृतोः**' (7-3-33) इति युगागमः। एवं घञि, णमुल्यपि ज्ञेयम्।
8. ण्यन्ते सर्वत्र, आदन्तलक्षणः पुगागमो ज्ञेयः।